# Papaduhkhasukhapurushapujanam

# પાપદુઃખસુખપુરુષપૂજનમ્

## Document Information

Text title : Papaduhkhasukhapurushapujanam

File name : pApaduHkhasukhapuruShapUjanam.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, pUjA

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 168/90-102||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# પાપદુઃખસુખપુરુષપૂજનમ્

(પાપદુઃખસુખપુરુષસ્તોત્રમ્)

પ્રસન્નવદનં સૌમ્યં પુષ્ટં શ્વેતં સુભૂષણમ્ ।
સ્વર્ણામ્બરં સમસ્તાઙ્ગકૃતશોભં સુયૌવનમ્ ॥ ૯૦॥

સર્વાભરણસંયુક્તં પુષ્પાક્ષતાદિભિઃ શુભૈઃ ।
પાયસં ચાપિ મિષ્ટાન્નં ફલાદિ ચાર્થયેદ્બલિમ્ ॥ ૯૧॥

ધર્મયુતં ભક્તિયુતં શીલવ્રતાદિસંયુતમ્ ।
પૂજયિત્વા શુભે પુણ્યે મન્દિરે ચાલયે તથા ॥ ૧૨॥

જલે વિસર્જયેદ્ભક્ત્યા સમ્પ્રાર્થ્ય ચ પ્રણમ્ય ચ ।
સર્વાત્મન્ સર્વલોકાનાં મહાનન્દપ્રદ પ્રભો ॥ ૯૩॥

તવ વાસેન મે નિત્યમહાનન્દઃ પ્રજાયતે ।
અવિમુક્તો મમ નિત્યં ભવ વાસં સદા કુરુ ॥ ૯૪॥

તવ દૃષ્ટ્યાપિ લોકેશા ભવન્તિ ચેશ્વરા દિવિ ।
પૃથ્વ્યા તે કૃપયા દેવ સુખિનઃ સન્તિ માનવાઃ ॥ ૯૫॥

તેનાઽહં ચ સુખી સ્યાં વૈ પ્રસન્નો વરદો ભવ ।
ઇત્યભ્યર્થ્ય સુખં દેવં પૂજયિત્વા પ્રણમ્ય ચ ॥ ૯૬॥

વિસર્જયેજ્જલમધ્યે પૂજકઃ સુખવાન્ ભવેત્ ।
નરો નારી ચ વા નાન્યતરોઽપિ ચોક્તરીતિતઃ ॥ ૯૭॥

પૂજયિત્વા લભેલ્લક્ષ્મીં સમ્પદં ધનમુત્તમમ્ ।
પુત્રં પશું ક્ષિતિં નારીં વંશવિસ્તારમિત્યપિ ॥ ૯૮॥

અદુઃખં લભતે નિત્યં મહોત્સવાન્ પ્રપદ્યતે ।
અત્ર લોકે ભવેચ્ચાપિ મહાસમૃદ્ધઃ પરત્ર ચ ॥ ૯૯॥

મહાભોગાન્ પ્રસમ્પાદ્ય મોક્ષલોકં પ્રયાતિ સઃ ।

ન તસ્ય જાયતે હાનિશ્ચાકસ્માત્તો ન જાયતે ॥ ૧૦૦॥

પીડા ચાકસ્મિકી ચાપિ દારિદ્ર્યં નૈવ જાયતે ।
નિત્યં સમ્પત્ સુખં સર્વં વર્ધતે ભોગ ઉત્તમઃ ॥ ૧૦૧॥

પઠનાચ્છ્રવણાદસ્ય પૂજનસ્ય ફલં ભવેત્ ।
સુખવાન્ ધનવાન્ સ્યાચ્ચ દાતા ભવેત્ પુનઃ પુનઃ ॥ ૧૦૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૬૮-અધ્યાયાન્તર્ગતં પાપદુઃખસુખપુરુષપૂજનં તથા સ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૬૮/૯૦-૧૦૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 168/90-102..

Proofread by PSA Easwaran

---

*Papaduhkhasukhapurushapujanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*